लक्ष्यं विश्वमानम्

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Programme 5th Semester Examination, 2022-23

## SANGDSE01T-SANSKRIT (DSE1)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) रुद्रस्तुतिः कस्य वेदस्य कस्मिन् अध्याये वर्तते ?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः ?

(ग) 'नमस्ते रुद्र मन्यवे' इत्यत्र मन्यवे इति पदस्य कोऽर्थः ? तस्य इषवे कथं नमः क्रियते ?

(घ) रुद्रदेवस्य शरीरं कीदृशम् ?

(ङ) रुद्रदेवः ताम्रः इति कथमुच्यते ?

(च) रुद्रदेवः कथं नीलग्रीव इत्युच्यते ?

(छ) 'कपर्दी' इति पदस्य कोऽर्थः ? रुद्रः कथं कपर्दी उच्यते ?

2. अधोलिखितयोः एकस्य प्रश्नस्य उत्तरं प्रदेयम् – 10×1 = 10

(क) शुक्लयजुर्वेदस्य रुद्राध्यायमनुसृत्य रुद्रदेवस्य स्वरूपं वर्ण्यताम्।

(ख) शुक्लयजुर्वेदस्य रुद्राध्याये रुद्रदेवस्य स्तुतिः यथा कृता सा संक्षेपेण लेख्या।

3. यथेच्छं मन्त्रद्वयं व्याख्येयम् – 5×2 = 10

(क) नमस्ते रुद्र मन्यव उत त इषवे नमः।
बाहुभ्यामुत ते नमः॥

(ख) शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्॥

(ग) असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चैनं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे॥

## SECTION-B

4. यथेच्छम् एकस्य उत्तरं प्रदेयम् – 10×1 = 10

(क) बृहदारण्यकोपनिषदः चतुर्थब्राह्मणमाश्रित्य आत्मस्वरूपं लिख्यताम्।

(ख) उपनिषदित्यस्य कोऽर्थः ? बृहदारण्यकोपनिषदः भवत्पाठ्यमनुसृत्य उपनिषदः महत्त्वं वर्ण्यताम्।

5. अधोलिखितेषु यथेच्छं द्वयं संस्कृतभाषया देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) येनाहं नामृता स्यां किमहं तेन कुर्याम्।

(ख) अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।

(ग) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

——×——